# वैयाकरणसिद्धान्तकौमुदी

## अव्ययप्रकरणम् (०१)

## १८.०९.२०१२

# ४४७. स्वरादिनिपातमव्ययम् (१.१.३७)

- पदद्वयम् । स्वर्-आदि-निपातम्, अव्ययम् ।
- स्वरादयः निपाताः च अव्ययसंज्ञाः स्युः ।
- स्वरादिः आकृतिगणः ।
- ‘प्राग्रीश्वरान्निपाताः’ (१.४.५६) इति निपातसंज्ञा ‘अधिरीश्वरे’ (१.४.९७) इति सूत्रपर्यन्तम् अधिक्रियते । तत्र पठिताः निपाताः अपि अव्ययसंज्ञां प्राप्नुवन्ति ।
- ‘चादयोऽसत्त्वे’ (१.४.५७) - चादिरपि आकृतिगणः ।

# ४४८. तद्धितश्चासर्वविभक्तिः (१.१.३८)

- पदत्रयम् । तद्धितः, च, असर्वविभक्तिः ।
- 'स्वरादिनिपातमव्ययम्' (१.१.३७) इत्यतः 'अव्ययम्' इति अनुवर्तते ।
- यस्मात् सर्वा विभक्तिः नोत्पद्यते स तद्धितान्तः अव्ययं स्यात् ।
- सर्वा=वचनत्रयात्मिका विभक्तिः यस्मात् नोत्पद्यते, किन्तु एकवचनान्येव उत्पद्यन्ते, सः तद्धितान्तः अव्ययसंज्ञः स्यात् ।
- परिगणनं कर्तव्यम् - तसिलादयः प्राक्पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्यः, अम्, आम्, कृत्वोऽर्थाः, तसिवती, नानाञाविति ।

- तसिलादयः -
- पञ्चम्यास्तसिल् (५.३.७) - द्वित्र्योश्च धमुञ् (५.३.४५)
- सर्वतः, सर्वत्र, सर्वदा, सर्वथा, एकधा

- शस्प्रभृतयः
- बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् (५.४.४२) - अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् (५.४.५७)
- बहुशः, अल्पशः, शुक्ली-करोति, अग्निसात्, पटपटा

- अमु च च्छन्दसि (५.४.१२)
- प्रतरं न आयुः

- किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे (५.४.११)
- किंतराम्, पचतितमाम्

- कृत्वोऽर्थाः
- संख्यायाः क्रियाऽभ्यावृत्तिगणने कृत्वसुच् (५.४.१७), द्वित्रिचतुर्भ्यः सुच् (५.४.१८), विभाषा बहोर्धाऽविप्रकृष्टकाले (५.४.२०)
- पञ्चकृत्वः, द्विः, त्रिः, बहुधा

- तसिश्च (४.३.११३), तेन तुल्यं क्रिया चेद्वतिः (५.१.११५)
- ग्रामतः, राजवत्

- विनञ्भ्यां नानाञौ नसह (५.२.२७)
- विना, नाना

- तेनेह न - पचतिकल्पम्, पचतिरूपम्
- ईषदसमाप्तौ कल्पब्देश्यदेशीयरः (५.३.६७)
- प्रशंसायां रूपप् (५.३.६६)

# ४४९. कृन्मेजन्तः (१.१.३९)

- पदद्वयम् । कृत्, मेजन्तः ।
- ‘स्वरादिनिपातमव्ययम्’ (१.१.३७) इत्यतः ‘अव्ययम्’ इति अनुवर्तते ।
- कृद् यो मान्तः एजन्तश्च तदन्तम् अव्ययं स्यात् ।
- स्मारं स्मारम् ।
- ‘आभीक्ष्ण्ये णमुल् च’ (३.४.२२) - (णमुल्) अम्
- जीवसे
- ‘तुमर्थे सेसेनसे...’ (३.४.९) - से
- पिबध्यै
- ‘तुमर्थे सेसेनसे..’ (३.४.९) - (शध्यै) अध्यै

# ४५०. क्त्वातोसुन्कसुनः (१.१.४०)

- एकपदात्मकं सूत्रम् । क्त्वा-तोसुन्-कसुनः ।
- 'स्वरादिनिपातमव्ययम्' (१.१.३७) इत्यतः 'अव्ययम्' इति अनुवर्तते ।
- एतदन्तम् अव्ययं स्यात् ।
- कृत्वा ।
- 'समानकर्तृकयोः पूर्वकाले' (३.४.२१)
- उदेतोः
- 'भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्' (३.४.१६)
- विसृपः
- 'सृपितृदोः कसुन्' (३.४.१७)

# ४५१. अव्ययीभावश्च (१.१.४१)

- पदद्वयम् । अव्ययीभावः, च ।
- 'स्वरादिनिपातमव्ययम्' (१.१.३७) इत्यतः 'अव्ययम्' इति अनुवर्तते ।
- अव्ययीभावसमासः अव्ययसंज्ञः स्यात् ।
- अधिहरि ।
- 'अव्ययं विभक्तिसमीप...' (२.१.६)

# ४५२. अव्ययादाप्सुपः (२.४.८२)

- पदद्वयम् । अव्ययाद्, आप्-सुपः ।
- 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' (२.४.५८) इत्यतः 'लुक्' इति अनुवर्तते ।
- अव्ययाद् विहितस्य आपः सुपश्च लुक् स्यात् ।
- तत्र शालायाम् ।
- विहितविशेषणात् नेह - अत्युच्चैसौ ।
- उच्चैः अतिक्रान्तः ।
- अव्ययसंज्ञायां यद्यपि तदन्तविधिः अस्ति, तथापि न गौणे ।

# आब्ग्रहणं व्यर्थमलिङ्गत्वात् (वा)

- सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
- वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥
- इति [भाष्योक्ता] श्रुतिः लिङ्गकारकसंख्याभावपरा ।
- अयं च लिङ्गकारकसंख्याभावनियमः निपातानामेव, स्वरादीनां तु कतिपयानां लिङ्गकारकसंख्याऽन्वयः अस्त्येव ।
- स्वस्ति वाचयति, स्वस्ति वाच्यः, क्षीणे पुण्ये स्वः पतति, प्रातर्यजते ।

- वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
- आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

- भागुरिनामकः आचार्यः अव-अपि इत्युपसर्गयोः आद्य-अकारस्य लोपम्, हलन्तानाम् आपं च वष्टि = इच्छति ।
- वगाहः - अवगाहः, पिधानम् - अपिधानम्

- वाचा निशा दिशा - परिगणनम् इति केचित्, उदाहरणमात्रम् इत्यन्ये ।

# ४५३. स्त्रियाम् (४.१.३)

अधिकारोऽयम् ।